National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 164-167
© 2025 NJHSR
www.sanskritarticle.com

**अंकित उपाध्याय**
Ph.D, शोधार्थी,
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत-विश्वविद्यालय, नई दिल्ली

**Correspondence:**
**अंकित उपाध्याय**
Ph.D, शोधार्थी,
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत-विश्वविद्यालय, नई दिल्ली

# पाणिनीय व्याकरणशास्त्रे व्यपदेशातिदेशस्य स्वरूपम्

**अंकित उपाध्याय**

भाषा मनुष्यस्य सर्वप्रमुखं अभिव्यक्तिपथं सञ्जातम्। सा केवलं विचारप्रकटनस्य साधनं न, अपितु संस्कृत्याः संवाहिकापि अस्ति। भाषायाः सुस्थिरता, शुद्धता च तस्या विन्यस्तव्यवस्थया सुनिश्चितेते, यस्य मूलं व्याकरणे निहितम्। संस्कृतभाषायाः व्याकरणशास्त्रं पाणिनीनिर्मितया अष्टाध्याय्या यथासम्भवमधिकृतम् अस्ति। अयं ग्रन्थः सूत्रशैलीया रचितः, यत्र सूत्राणि न्यूनपदानि, परन्तु अतिगम्भीरार्थप्रदायिनि भवन्ति।

पाणिनीयव्याकरणे सूत्राणि षड्विधानि परिगण्यन्ते—संज्ञासूत्रम्, परिभाषासूत्रम्, विधिसूत्रम्, निषेधसूत्रम्, नियमसूत्रम्, अतिदेशसूत्रम्, । एतेषां मध्ये अतिदेशसूत्राणि विशेषतया लक्षणीयानि भवन्ति, यतः तेषां माध्यमेन अन्यत्र सिद्धो विधिरपि नूतनप्रसङ्गेषु युक्तियुक्ततया प्राप्यते। 'अतिदेशः' इत्यस्य अर्थः—पूर्वसिद्धस्य विधेः अन्यत्र समुचिततया प्रक्षेपः इति।

विद्वद्भिः अतिदेशसूत्राणां षड्विधत्वं सप्तविधत्वम्-अष्टविधत्वञ्चेति स्वीकरोति। 'वैयाकरणसिद्धान्त-कौमुद्याः व्याख्यायां बालमनोरमाकारमतानुसारम् अतिदेशाः सप्तविधाः सन्ति। तदेवोक्तम् -

**'कार्यरूपनिमित्तार्थशास्त्रतादात्म्यशब्दिताः।**
**व्यपदेशश्च सप्तैतानतिदेशान् प्रचक्षते[1]।।" इति।**

एते सप्तविधाः अतिदेशशास्त्रप्रतिपादिताः सन्ति। ते च-

| | |
|---|---|
| (क) सामान्यातिदेशः | 'गुरुवत् गुरुपुत्रे वर्तितव्यम्' |
| (ख) रूपातिदेशः | 'तृज्वत् क्रोष्टुः" पा.सू. 7.1.95 |
| (ग) निमित्तातिदेशः | 'पूर्ववत्सनः पा.सू. 1.3.62 |
| (घ) व्यपदेशातिदेशः | आद्यन्तवदेकस्मिन् पा.सू. 1.1.21 |
| (ङ) शास्त्रतिदेशः | कर्मवत्कर्मणा कर्मतुल्यः पा.सू. 3.1.87 |
| (च) तादात्म्यातिदेशः | 'सुबामन्त्रिते पराङ्गवत्स्वरे पा.सू. 2.1.2 |
| (छ) कार्यातिदेशः | 'स्थानिवदादेशोऽनल्विधौ" पा.सू. 1.1.56 |
| (ज) अर्थातिदेशः | 'स्त्रीपुंवच्च" पा.सू. 1.2.66 |

**व्यपदेशातिदेशस्वरूपम्**

"अविद्यमानव्यपदेशप्रापणमिति व्यपदेशातिदेशः[2]" इति कथ्यते। येन सूत्रेण क्वचिदप्राप्त व्यपदेशस्य अतिदेशो विधीयते ते व्यपदेशातिदेशसूत्र इति कथ्यते। व्यपदेशस्य "मुख्यव्यवहारः" इत्यपि वक्तुं शक्यते। 'गौः'इत्यत्र गोत्वस्य, सास्नादिमत्त्वस्य वा निमित्तसद्भावात् 'गवि,गौः' इत्यपि व्यवहारोव् जायते। अतः अयं मुख्यः व्यवहारः, व्यपदेशः। यदा शास्त्रे यत्र निमित्ताभावो दृश्यते, तदा तत्र मुख्यव्यवहारस्य अभावोऽपि भवति। अतः तत्र तद्धर्मस्य अतिदेशेन तत्र व्यव्हृयते। यथा

"राम+भ्याम्" इत्यत्र "राम" इति अदन्तपदं वर्तते। मकारोत्तरवर्त्याकारस्य पूर्वे तु वर्णाः सन्ति, तथा च मकारोत्तरवर्त्याकारस्य परतः न कोऽपि वर्णः विद्यते। महाभाष्ये उक्तं पतञ्जलिना यथा – **"सत्यन्यस्मिन् यस्मात् परं नास्ति, पूर्वमस्ति सः अन्तः इति उच्यते"**[3] इत्युक्तम्। अतः "अन्त" इत्यस्य अर्थः चरमावयववाचकः इति सिध्यति। अन्तशब्देन चरमत्वं च अवयवत्वं च बोध्येते। एतौ अर्थौ अपि "राम" इत्यस्मिन् पदे अकारे दृश्यते। अतः "राम" इति पदं "अदन्तः" इति व्यवहारं लभते। एवं च तस्य अङ्गत्वं अपि सिध्यति। तस्मात् "सुपि च" इति सूत्रेण दीर्घं सिध्यति। परन्तु "इदं" इति पदे, "भ्याम्" इति प्रत्यये प्रयुज्यमाने, "त्यदादि" रूपेषु सति, अ + भ्याम् इति शेषं भवति। तत्र केवलं अकारः एव दृश्यते, तस्य परतः कश्चन वर्णः न अस्ति। अतः तत्र अन्तत्वव्यवहारः न शक्यते, तथा च दीर्घः अपि न स्यात्। अतः "आभ्याम्" इति रूपं युक्तं न भवति। एतस्मात् कारणात् "आद्यन्तवदेकस्मिन्" इति पाणिनिसूत्रेण अकारे अपि अन्तत्वव्यवहारः अतिदेशेन क्रियते। तेन "अ + भ्याम्" इत्यत्र अपि यदा अदन्ताङ्गस्य सत्त्वं अस्ति, तदा "सुपि च" इत्यनेन सूत्रेण दीर्घः स्वरः सिध्यति।

**आद्यन्तवद्भावातिदेशः**

**आद्यन्तवदेकस्मिन्**[4]

"आदिः च अन्तः च" – एतौ उभौ संहृत्य "आद्यन्त" इत्युच्यते। यः पदः यस्य आदिः च अन्तः च अस्ति, सः "आद्यन्तः" इति कथ्यते। "आद्यन्त" इत्यस्य अर्थः – यः शब्दः आदिना च अन्तेन च संयुक्तः अस्ति।

उपमानोपमेययोः समविभक्तिकत्वनियमानुसारं, यदा "एकस्मिन्" इत्ययं शब्दः उपमेयरूपेण सप्तमीविभक्त्या दृश्यते, तदा उपमानवाचकात् "अर्श आद्यजन्तात्" "आद्यन्त" इति पदनिर्माणं सिध्यति। एषः शब्दः द्वन्द्वसमासेन युतः भवति। यथा सप्तम्यन्तात् पदात् विशेषणं ग्रह्यते, तथैव अत्रापि अर्थग्रहणं भवति। यथा "तत्र तस्येव[5]" इति सूत्रे "वतिप्रत्ययः" प्रयुज्यते – यथा "मधुरावत् पाटलिपुत्रे प्राकारः" इत्यादौ। अत्र "व्यपदेशः भवति" इति अध्याहार्यं (पूर्वमेव अनुमानितं) योज्यते।

अस्मिन् सूत्रे "एकस्मिन्" इत्यनेन यः अर्थः गृह्यते, स एव अर्थः "आद्यन्त" पदे अपि "अर्श आद्यजन्त" तथा "आद्यन्तपद" इत्येताभ्यां गृह्यते, प्रत्यासत्तेः (निकटसम्बन्धस्य कारणात्)। एवं सूत्रस्य अर्थः भवति—यथा "एकस्मिन्" पदे आदौ च अन्ते च यः व्यवहारः दृश्यते, स एव व्यवहारः "आद्यन्त" इत्यस्यापि सन्दर्भे स्वीक्रियते, तत्र च तस्य व्यपदेशः (संज्ञा) भवति।

**संख्यावत्वातिदेशः**

"बहुगणवतुडति संख्या"

"बहुगण" शब्दः च " संख्या" शब्दः च – एते द्वौ यदा "वतु" प्रत्ययेन युक्तौ भवतः, तदा "यावत्", "तावत्", "प्रभृति" इत्यादयः शब्दाः उत्पद्यन्ते। तथैव "डति" प्रत्ययेन युक्तः "कति" शब्दः अपि तत्रैव गणनायां गण्यते। एते सर्वे अपि "संख्या-संज्ञा" या वर्गीकृताः – इत्ययं भावः स्वी काशिका-प्रभृतिषु टीकासु एतान् संज्ञा-सूत्रत्वेन एव विवृण्वते।

किन्तु महाभाष्ये तु एषः अर्थः अतिदेशरूपेण अपि व्याख्यातः – यतः "बहुगण", "वतुप्रत्ययवाचकः", "डतिप्रत्ययवाचकः" च एते संख्या-सदृशं व्यवहारं कुर्वन्ति।

यथा "अब्रह्मदत्ते" इत्यत्र ब्रह्मदत्तशब्दप्रयोगः यद्यपि ब्रह्मदत्तः नास्ति, तथापि "ब्रह्मदत्तवत्", "ब्रह्मदत्तसदृशः" इत्यर्थः बोध्यते। तथा च "असिंहे" इत्यादौ – "सिंहो माणवकः" इत्यत्र अपि सिंहसदृशः इत्येव भावः प्रकाशते, न तु सः वास्तवतः सिंहः।

एवमेव, यदि कश्चन सन्दर्भः संख्यावाचकपदस्य उपयोगं करोति, यत्र वस्तुतः संख्या नास्ति, तदा सः "संख्यावत्" इत्यर्थं दर्शयति। अतः अत्रापि पूर्वोक्तः एव अर्थः बोध्यते।

एवं तस्मात् यत्र वतुप्रत्ययः नास्ति, तत्रापि यदि अर्थलक्षणया तादृश एव भावः सूचितः भवति, तर्हि "वत्"- सदृशं लक्षणया अर्थग्रहणं स्वीकार्यं भवति।

**ङित्त्वकित्त्वातिदेशौ**

**"गाङ्कुटादिभ्योऽञ्णित्[6]"**

अत्र "गाङ्" पदस्य प्रयोगः "गाङ् लिटि[7]" तथा "विभाषा लुङ्लुङोः[8]" इत्येताभ्यां सूत्राभ्यां निबद्धः, यत्र इङ् धातोः स्थाने "गाङ्" इत्यादेशः विधीयते। "तुदादिगणे" – "कुट्", "कौटिल्ये" इत्यादयः धातवः यावत् "कुङ् शब्दे" पर्यन्तं यः गणः दृश्यते, सः कुटादिगणः इति अभिधीयते। एवं च यदा इङ् धातोः स्थाने गाङ् आदेशः भवति, तथा कुटादिगणेभ्यः परं यदा जित् (जकारयुक्तः) तथा णित् (णकारयुक्तः) भिन्नौ प्रत्ययौ आगच्छतः, तदा ते प्रत्ययाः ङित्त्वेन गृह्यन्ते – एषः एव सूत्रस्य भावः।

यत्र अङित् (अणकाराभावयुक्तः) प्रत्ययः भवति, तत्रापि यदि ङि-शब्दः प्रयुज्यते, तर्हि तस्य ङिद्वत् व्यवहारः गम्यते। यथा – "सिंहो माणवकः" इत्यत्र सिंहवत् इत्यर्थः बोध्यते, तथा "एष ब्रह्मदत्तः" इत्यत्र ब्रह्मदत्तवत् इत्यपि – एवं वर्तमानेऽपि अयं भावः अनुमीयते।

यथा "अध्यगीष्ट", "अध्यगीषाताम्" इत्यादिषु रूपेषु सिच्-प्रत्ययः दृश्यते, यः संप्रसारणं करोति। सः च ङित्त्वातिदेशेन प्रकृतसूत्रेण योज्यते, तस्मात् "घुमास्थागापाजहातिसां हलि[9]" इति सूत्रेण इङ् धातोः गा इत्यस्य "ई" इत्यादेशः भवति। कुटिता, कुटितुम्, चुकुटिषते, कुटिष्यति इत्यादौ अञ्णित् प्रत्ययानां ङित्त्वातिदेशेन

धातोः गुणनिषेधः भवति। अञ्णिदित्युक्तत्वात् चुकोट इत्यत्र णलः, कोटः इत्यत्र घञः, न ङित्त्वातिदेशः ।

**"सार्वधातुकमपित्[10]"**

सूत्रस्य अर्थः अस्ति यत् अपित् सार्वधातुकप्रत्ययाः, ये ङित् न सन्ति, ते ङित् इति समानरूपेण मन्यन्ते (ङिद्वत्) च तेषामनुसारं व्यवहारः अस्ति। **श्यन्**, **श**, **श्नु** इत्यादयः विकरणप्रत्ययाः, **खश्**, **शतृ**, **शानच्** इत्यादयः कृत्प्रत्ययाः, तथा **तिप्**, **सिप्**, **मिप्** इत्येतत् तिङ् प्रत्ययाः सन्ति। **लिट्** तथा **आशिषि लिङ्** स्थानेषु यः परस्मैपदसंज्ञकः आत्मनेपदसंज्ञकश्च तिङ् प्रत्ययः, ते अपित् सार्वधातुकमानेयाः, यद्यपि ते अजात (अकारादि) रूपेण अस्ति।

यदा एतेषां प्रत्ययेषु प्रकृतसूत्रेण ङित्त्वस्य अतिदेशः कर्तुं शक्यते, तदा तस्य परिणामे गुणनिषेधः, **इच् आदेशः** (संप्रसारणः) इत्यादयः नियमाः लागन्ति।

**"तुद् + अ + ति" = "तुदति"** अत्र "श" प्रत्ययः अपित् सार्वधातुकः अस्ति, यत्र ङित्त्वस्य अतिदेशः कृतः। तस्मिन्गतधातोः **"क्ङिति च"** (1.1.5) सूत्रेण गुणनिषेधः संपद्यते।

द्वितीयं उदाहरणम्: **"एध् + अ + आताम्" = "एधाते"** अत्र "आताम्" प्रत्ययस्य ङिद्वत् व्यवहारस्य परिणामे "आ" पश्चात् "ङित्" अकारस्य आगमनात् "इय्" प्राप्तं भविष्यति। एषा प्रक्रिया **"आतो ङितः[11]"** सूत्रेण स्थापितं अस्ति, यः "एधेते", "एधेथे" इत्यादीनि रूपाणि निर्माति।

तृतीयं उदाहरणम्: **"ग्रह् + ना + ति" = "गृह्णाति"** अत्र ङित्त्वस्य अतिदेशे संप्रसारणः (इच् आदेशः) सम्पद्यते, यः फलस्वरूपेण "गृह्णाति" रूपं निर्मीयते।

"असंयोगाल्लिट् कित्"

धातोः परे अपिल्लिट्, कित्स्यात्, किद्वत्स्यात् इति सूत्रार्थः। यदि धातु परे अपिल्लिट् संयोगं न प्राप्तं, तर्हि कित्त्वातिदेशे निषेधः क्रियते इति तात्पर्यः। उदाहरणस्वरूपं निन्यतुः, बिभिदतुः इत्यादीनि दृष्टान्तानि। **निन्यतुः** - णीञ् धातुः लिट् प्रत्ययः प्रथमपुरुष द्विवचन रूपे, तस्य अतुसादेशे, धातोः द्वित्वे, अभ्यासकार्येषु कृतेषु, निनी + अतुस् इति रूपे जातम्। अत्र "अतुरूप" लिट् संयोगात् परो नास्ति, तस्मिन्ने प्राप्तसूत्रेण कित्त्वातिदेशे, "क्ङिति च[12]" इति सूत्रेण निषेधात् गुणाभावः, "एरनेकाचोऽ संयोगपूर्वस्य[13]" इति सूत्रेण यणि निन्यतुः इति रूपं प्राप्तं अस्ति।

एवं **निन्युः**, **निन्यथुः**, **निन्य**, **निन्यिव**, **निन्यिम** इत्यत्र **उस**, **अथुस्**, **अ**, **व**, **म** प्रत्ययेषु लिट् आत्मनेपदप्रत्ययेषु सर्वत्र **कित्त्वातिदेश** प्राप्तं अस्ति।

**कित्त्वफलम् - बिभिदतुः** इत्यादौ उपधागुणाभावः, **ईजतुः**, **ईजुः** इत्यादौ **'वचिस्वपियजादीनां किति[14]'** इति सूत्रे सम्प्रसारणं, **जजागरतुः**, **जजागरुः** इत्यादौ **'जाग्रोऽविचिण्णङित्सु[15]'** इति सूत्रेण गुणप्रवृत्तिर्व्यवस्था इत्येवम्।

**यासुटः ङित्त्वकित्त्वव्यपदेशातिदेशौ**

"यासुट् परस्मैपदेषूदात्तो ङिच्च"

"किदाशिषि"

अन्यायैव पद्धत्या — "लिङः परस्मैपदानां यासुट् आगमः स्यात्, स च ङित् च भवति" इत्यर्थे, **"यासुट् परस्मैपदेषु दात्तो ङिच्"** इति सूत्रस्य द्वितीयभागस्य आधारेण "कुर्यात्" इत्यादिषु रूपेषु यासुट् प्रत्ययः ङिद्व्यपदेशातिदेशेन उपपद्यते।

तथैव आशिषि लिङ् इत्यत्र यासुट् प्रत्ययः कित् भवेत् इति भावे, **"किदाशिषि"** इति सूत्रेण "उच्यात्" इत्यादिषु रूपेषु यासुट् प्रत्ययस्य किद्व्यपदेशातिदेशः क्रियते। एवं **णित्त्वातिदेश** अपि वस्तुतः **व्यपदेशातिदेश** एव भवति।

**णित्त्वव्यपदेशातिदेशः**

"गोतो णित्"

'**इतोऽत्सर्वनामस्थाने[16]**' इत्यनेन सूत्रेण सर्वनामस्थाने इत्यनुवृत्तिः स्वीक्रियते। '**णित्**' इत्यनेन शब्देन सामानाधिकरण्यं सिध्यति, ततः प्रथमान्त रूपेण तस्य प्रयोगः भवति। अत एव, गो शब्दात् परं यदि सर्वनामस्थानं भवति, तर्हि तत् णित् भवेत् — इत्येषः सूत्रार्थः।

यथा — "एष ब्रह्मदत्तः", "सिंहो माणवकः" इत्यत्र ब्रह्मदत्तशब्दस्य वा सिंहशब्दस्य प्रयोगः साधारणवाचकत्वेन न स्फुटं, किन्तु वाच्यार्थान्वयस्य अनुपपत्तेः ते ब्रह्मदत्तवत्, सिंहवत् इत्यर्थं बोधयन्ति। एवं प्रकृतेऽपि 'णित्' शब्दः प्रत्यक्षार्थे न युज्यते, अपितु णिद्वत् इत्यर्थं प्रतिपादयति। अत एव णिद्वत् स्यात् इत्यर्थः सिद्ध्यति। गो + औ, गो + अस् इत्यत्र, औ तथा अस् इत्येतयोः प्रत्यययोः प्रकृतसूत्रेण णिद्व्यपदेशातिदेशः क्रियते। तत्सम्बन्धेन 'अचो ञ्णिति[17]' इति सूत्रेण गोशब्दस्य अन्ते स्थितस्य ओकारस्य वृद्धिः — औकारः, तस्य आवादेशः च क्रियते। तस्मात् गावौ, गावः इत्यादि रूपाणि सिद्ध्यन्ति।

**उपसंहार**

पाणिनीयशब्दानुशासने संज्ञादि षड्विधसूत्राणां मध्ये अतिदेश-सूत्राणां गणना भवति, तत्र सप्तविध अतिदेश सूत्राणां उल्लेखो प्राप्यते। तेषां मध्ये "व्यपदेशातिदेश" अतिविशिष्ट महत्वेन तिष्ठति। प्रस्तुत शोधपत्रे व्यपदेशातिदेशस्य स्वरूपं स्पष्टमत्र कृतवान्।

अष्टाध्याय्यां बहूनि व्यपदेशातिदेश सूत्राणि सन्ति अत्र तेषु मध्ये प्रमुखसूत्राणां वर्णनमत्र प्रतूयते। व्यपदेशातिदेशे "आद्यन्तवद्भावाति-देशः, संख्यावत्वातिदेशः, ङित्त्वकित्त्वातिदेशौ, यासुटः ङित्त्वकित्त्व-व्यपदेशातिदेशौ, णित्त्वव्यपदेशातिदेशः प्रमुखाः सन्ति। आद्यन्तव-देकस्मिन्, बहुगणवतुडति संख्या, गाङ्कुटादिभ्योऽञ्णित्, सार्वधातुमपित्, असंयोगाल्लिट् कित्, यासुट् परस्मैपदेषुदात्तो ङिच्च, किदाशिषि, गोतो णित् एते प्रमिखानि सूत्राणि सन्ति। एतेषां सूत्राणां संस्कृत व्याकरणे अतीव महत्वमस्ति।

**संदर्भ ग्रन्थ**

1. अतिदेशसूत्रव्याख्यानम् – पण्डितरामरूपशर्मा। जयव्रत संस्कृत पुस्तकालय, जयपुर। प्र.सं. 2011।
2. अष्टाध्यायीसूत्रपाठः – पाणिनिः। श्रीबालमनोरम मुद्रणालय, मैलापुर, मद्रास। द्वितीयसंस्करणम्, 1937।
3. पाणिनीय अतिदेशानुशीलनम्, डॉ. श्रिष्ठि राष्ट्रियसंस्कृतविद्या-पीठम्, तिरुपतिः, 2008 लक्ष्मीनरसिंहः.
4. काशिका,न्यास-पदमञ्जरी-भावबोधिनी सहिता, डॉ. जयशङ्कर-लालत्रिपाठी, तारा बुक एजेन्सी, वाराणसी, प्र.सं. 1989, पुनर्मुद्रणः 2012
5. वैयाकरणसिद्धान्तकौमुदी,(बालममनोरमातत्त्व बोधिनी सहिता), मोतीलाल बनारसीदास प्रकाशनम्, वाराणसी

**पाद टिप्पणी:**

[1]इयं कारिका बालमनोरमाटीकायामुल्लिखितम्। वै.सि.कॉ. पू. 312, श्रीगोपालदत्तपाण्डेयः, चौखम्बाप्रकाशनम्, वाराणसी।

[2]पाणिनीये अतिदेशानुशीलनम्

[3]महाभाष्य

[4]पाणिनीय सूत्र १.१.२१

[5]पाणिनीय सूत्र ५.१.११६

[6]पा. सू. 1.2.1

[7]पा.सू. 2.4.49

[8]पा. सू. 2.4.50

[9]पा.सू 6.4.66

[10] पा. सू.1।2।4

[11] पा.सू. 7.2.81

[12] पा.सू 1.1.5

[13] पा.सू 6.4.82

[14] वही 6.1.15

[15] पा. सू. 7.3.85

[16] पा.सू 7.1.86

[17] पा.सू7.2.115